# Ekadanta Stuti Naradamunikrita

# નારદમુનિકૃતા એકદન્તસ્તુતિઃ

## Document Information

Text title : Ekadanta Stuti Naradamunikrita

File name : ekadantastutiHnAradamunikRRitA2.itx

Category : ganesha, mudgalapurANa, stuti, ekAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 52 | 2.52. 25-38||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# નારદમુનિકૃતા એકદન્તસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
નમસ્તે ગજવક્ત્રાય ગણેશાય નમો નમઃ ।
અનન્તાનન્દભોક્ત્રે વૈ બ્રહ્મણે બ્રહ્મરૂપિણે ॥ ૨૫॥
આદિમધ્યાન્તહીનાય ચરાચરમયાય તે ।
અનન્તોદરસંસ્થાય નાભિશેષાય તે નમઃ ॥ ૨૬॥
કર્ત્રે પાત્રે ચ સંહર્ત્રે ત્રિગુણાનામધીશ્વર ।
સર્વસત્તાધરાયૈવ નિર્ગુણાય નમો નમઃ ॥ ૨૭॥
સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિપ્રદાય ચ ।
બ્રહ્મભૂતાય દેવેશ સગુણાય નમો નમઃ ॥ ૨૮॥
પરશું દધતે તુભ્યં કમલેન પ્રશોભિને ।
પાશાભયધરાયૈવ મહોદર નમો નમઃ ॥ ૨૯॥
મૂષકારૂઢદેવાય મૂષકધ્વજિને નમઃ ।
આદિપૂજ્યાય સર્વાય સર્વપૂજ્યાય તે નમઃ ॥ ૩૦॥
ગુણસંયુક્તકાયાય નિર્ગુણાત્મકમસ્તક ।
તયોરભેદરૂપેણ ચૈકદન્તાય તે નમઃ ॥ ૩૧॥
વેદાન્તાગોચરાયૈવ વેદાન્તાલભ્યકાય તે ।
યોગાધીશાય વૈ તુભ્યં બ્રહ્માધીશાય તે નમઃ ॥ ૩૨॥
અપારગુણધારાયાનન્તમાયાપ્રચાલક ।
નાનાવતારભેદાય શાન્તિદાય નમો નમઃ ॥ ૩૩॥
વયં ધન્યા વયં ધન્યા યૈર્દૃષ્ટો ગણનાયકઃ ।
બ્રહ્મભૂયમયઃ સાક્ષાત્ પ્રત્યક્ષં પુરતઃ સ્થિતઃ ॥ ૩૪॥
એવં સ્તુત્વા પ્રહર્ષેણ નનૃતુર્ભક્તિસંયુતાઃ ।
સાશ્રુનેત્રાન્ સરોમાઞ્ચાન્ દૃષ્ટ્વા તાન્ ઢુણ્ઢિરબ્રવીત્ ॥ ૩૫॥
(ફલશ્રુતિઃ)

એકદન્ત ઉવાચ ।
વરં વૃણુત દેવેશા મુનયશ્ચ યથેપ્સિતમ્ ।
દાસ્યામિ તં ન સન્દેહો ભવેદ્યદ્યપિ દુર્લભઃ ॥ ૩૬॥
ભવત્કૃતં મદીયં યત્ સ્તોત્રં સર્વાર્થદં ભવેત્ ।
પઠતે શ ृણ્વતે દેવા નાનાસિદ્ધિપ્રદં દ્વિજાઃ ॥ ૩૭॥
શત્રુનાશકરં ચૈવાન્તે સ્વાનન્દપ્રદાયકમ્ ।
પુત્રપૌત્રાદિકં સર્વં લભતે પાઠતો નરઃ ॥ ૩૮॥

ઇતિ નારદમુનિકૃતા એકદન્તસ્તુતિઃ સમ્પૂર્ણા ॥
એકાદશસ્તોત્રં
- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૫૨ । ૨.૫૨। ૨૫-૩૮॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 52 . 2.52. 25-38..

Proofread by Yash Khasbage, Preeti Bhandare

*Ekadanta Stuti Naradamunikrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*